20-4

॥ श्रीः ॥

॥ श्रीसद्गुरुचरणसमर्पणम् ॥

यत्कारुण्यलवाश्रयेण परमं भाग्यं मयाऽऽसादितं
श्रीश्रङ्गेरिजगद्गुरोरधिगता सा ब्रह्मविद्याप्यभूत् ।
भक्त्या भक्तिरसायनं नवमिदं मुद्रापय पूर्वं स्वयं
गीतास्वामिजयश्च तच्चरणयोः कृत्वा कृतार्थोस्म्यहम् ॥ १ ॥

यत्पादाम्बुजसंश्रयेण महतां सेवां समासेदिवान्
क्षेत्रालिङ्गितपुण्यतीर्थसरितां यात्राश्च संप्राप्तवान् ॥
कृष्णस्तस्य गुरोर्बहिश्चर इव प्राणः पदाम्भोजयो-
राद्ये वर्षमहोत्सवेऽद्य कुरुते प्रीत्यै नवोपायनम् ॥ २ ॥

बार्हस्पत्ययुवाब्दकार्त्तिकमहामासे तृतीयातिथौ
पक्षे कृष्णमये शनैश्चरदिने संमुद्य भक्त्या मया ।
पूर्वोपार्जितपुण्यपुञ्जबलतः काश्यां गुरोरुत्सवे
ब्रह्मीभूततदीयपादयुगले चैतत्प्रणम्यार्पितम् ॥ ३ ॥

अस्मिन् वर्षमहोत्सवेऽखिलबुधानन्दावहे सांप्रतं
स्वीकृत्येदमुपायनं नवरसं भक्त्या प्रणम्यार्पितम् ।
गीतास्वामियतीश्वरो गुरुवरो विश्वेश्वरैक्यं गतः
क्षिप्रं नः कुरुतां प्रसादमतुलस्वाराज्यसौख्यप्रदम् ॥ ४ ॥

इति शम्

20-4

विषयाः ।



१—सद्गुरुचरणसमर्पणम्

२—श्रीगीतास्वामिविजयभूमिका

३—श्रीगीतास्वामिविजयः

४—तदीयविदेहमुक्तिश्लोकाः

५—नवभक्तिरसायनभूमिका

६—नवभक्तिरसायनम्

७—स्वागतसमर्पणम्



शुद्धाशुद्धपत्रिका ।

भूमिकायाम्

पृ०	प०	अशु०	शु०
२	१०	श्रिमद	श्रीमद
३	८	श्रकिाश्यां	श्रीकाश्यां
६	२०	षिश्वश्वर	विश्वेश्वर

श्रीगीतास्वामिविजये

पृ०	प०	अशु०	शु०
५	१	कृष्णेनाव	कृष्णेनावर
७	५	शुभवासरे	शुभवत्सरे
७	१८	कशी	काशी
१०	१०	अन्तस्फू	अन्तःस्फू
१२	९	तुं	तु
१९	२	सौरे	सूरिः
१९	११	विषयः	विषयाः
१९	१६	ब्रह्मीभाव	ब्रह्मीभाव

भूमिका ।

इदमिदानीं किञ्चिदिव प्रस्तूयते श्रीप्रज्ञानानन्दसरस्वती-विजयापरनामधेयं श्रीगीतास्वामिविजयं प्रति ।

इमे च स्वामिपादाः विन्ध्यस्य दक्षिणे ईश्वरनामनि संवत्सरे परशुरामक्षेत्रान्तर्गते कूडलूराख्ये महद्भिरतिशिष्टैरवनिसुराग्रेसरैरध्युषिते महति कस्मिंश्चिदग्रहारे, गायत्र्याख्यतरङ्गिणीतरङ्गपरिप्लाविते, लक्ष्मीदेव्यां श्रीरामभट्टाख्यविप्रवरात् स्वीयं पुण्यतमं जन्मालभन्त । भ्रातृभिस्सप्तभिस्सोदरीभ्यां द्वाभ्याञ्च साकं समभूज्जन्म एतेषाम्। नाम च तदाभूदेतेषां वेङ्कटराम इति। वयस्यतिबालेऽपि अवधीरितवाचस्पतिमतिविभवा इमे बालक्रीडादिषु सर्वेष्वपि कार्येषु तदानींतनेषु सर्वानप्यात्मीयानतिशेरते स्म वयस्यान्। यथाकालमुपनीताश्च तस्मिन्नेव वयसि आस्तिकतायां, तपोनिष्ठतायां, भगवद्भक्तौ, गायत्र्याराधने, महत्सेवायाञ्च न केवलमावहन्ननितरसाधारणीं नैपुणीम्; किन्तु तदानीमेवातिमहता वैराग्यवैभवेनापि विभूषिता आसन् इतीदमजनयदमन्दमानन्दमवलोकयताम् ॥

एवं भगवदाराधनादौ स्वीयं कालं यापयतामेतेषां, यद्यपि समजनि सुरभारत्या भगवत्याः पठनस्य समारम्भः स्वीये विंशे एव वयसि, तथापि अत्यल्पेनैव समयेन सा भगवती गैर्वाणी वाणी सुपरिचितेव प्राक्तनजन्मनि, सादरं सुदृढ़मालिङ्गतिस्मैनान्। एवं प्रायशस्सर्वेष्वपि तीर्थेषु समासाद्य स-

मुचितं पाण्डित्यं स्वीये पञ्चविंशे वयसि, स्वसदृशैर्लब्धविद्यावैशद्यैस्स्वसमनन्तरजन्मभिः श्रीकृष्णशास्त्रिभिस्साकं प्रस्थाय स्वीयात् गृहात्, अवाप्य कमलालयचिदम्बरादिकं पुण्यं क्षेत्रं, उपसङ्गम्य च महतस्तत्रत्यानाचार्यपादानाध्यात्मिकविद्यापारदृश्वनः, परिचर्य तच्चरणनलिने, परिगृह्य च तैरतितुष्टैस्सानुग्रहमुपदिष्टामाध्यात्मिकीं विद्यां शान्तिपाठपुरस्सरं, ततः प्रतिनिवृत्य शृङ्गगिरिमवापुरद्वैतसिद्धिब्रह्मानन्दीयाद्यध्ययनार्थम् ॥

तत्र च श्रीमन्तः पूज्यपादाः श्रीमज्जगद्गुरुश्रीशारदापीठाधिपतयः श्रिमदभिनवनृसिंहभारतीस्वामिनः बहोरेव कालात्पूर्वमध्यापनतः विरता अपि 'नेतः परमध्यापयामी'ति गृहीतनियमा अपि, एतेषामतिविस्मापनीं प्रतिभाशक्तिमवेक्ष्य, विनयनम्रताञ्च,स्वीयमप्युल्लङ्घ्य नियममिमानध्यापयन्नत्यादरेण। मुक्त्वा शयनाहारसमयमनवरतमाचार्याणामन्ते वसद्भिरेभिर्न केवलमाध्यात्मिकी विद्याऽधिगता, प्रायशस्तदीया गुणा अप्यभ्यस्ताः सर्वोत्तमाः।

एवं ब्राह्मेण तेजसा स्वतस्सिद्धेन,गायत्रीजपाराधनादिना च परिपुष्टेन, ब्रह्मचर्येण च महता, विद्यया चाध्यात्मिक्याऽत्युत्तमया, सर्वोत्कृष्टया च वैराग्यसम्पदा विराजमाना इमे तृणीकृत्य तुच्छं वैषयिकं सुखाभासं, अवधीर्य च गार्हस्थ्यमखिलदुःखास्पदं, कञ्चित्कालं नैष्ठिकब्रह्मचर्येण, ततः प्रव्रज्यया चात्मनो जीवनकालशेषं निनीषवः स्वीये द्वात्रिंशे वयसि प्रास्थि-

षतोत्तरदेशं प्रति तीर्थयात्रार्थं साकं भ्रातृभ्याम्। प्रस्थाय चैवं,अटित्वा सर्वानपि तीर्थविशेषान् क्षेत्रविशेषांश्च, परिज्ञायैतत्पाण्डित्यं परिचरितुमागतेभ्यः प्रार्थितवद्भ्यश्च तत्रत्येभ्यो जनेभ्यः वितीर्य महान्तमुपदेशमध्यात्मविषयकं, क्रमशो भगवतो भवानीपते राजधानीमासेदुरत्रभवतीं वाराणसीम् ॥

आसाद्य च तां, उषित्वा च तत्र कञ्चित्कालं,तत्तादृशेऽपि नैष्ठिके ब्रह्मचर्ये चिरकालमात्मनोऽवस्थितिमनुचितां मन्वाना इमे तत्रैव श्रकाश्यां तारकमठस्थं सुप्रसिद्धानां स्वयंप्रकाशानन्दसरस्वतीस्वामिपादानां अत्यन्तप्रियशिष्यभूतं अद्वैतानन्दसरस्वतीनामधेयं कञ्चन गुरुवरमुपगम्य ततः पारिव्राज्यसाम्राज्यमगृह्णन्नात्मनश्चत्वारिंशे वयसि। एवं पारमहंस्यं भावमावहन्तः प्रज्ञानानन्दसरस्वत्याख्यया विभूषिता इमे आत्मारामा अप्यज्ञजनानुजिघृक्षया परं, अतः प्रस्थाय दक्षिणदेशं प्रति, मधुरानवसालपुर्यां (पुदुक्कोट्टै) दिषु तत्रत्यजनप्रार्थनापरतन्त्राः अतिगम्भीरेण, प्रतिविषयमुदाहरणपरिपूरितेन, सरळसरळेन अज्ञानपि विज्ञान् कुर्वता, अश्मनोऽपि विद्रावयता,अनाविलेन, श्रीगीतामृतपरीवाहेण पारिप्लावयन्तोऽनुदिनमन्तःकरणानि श्रवणार्थमागतानां परस्सहस्राणां जनानां,कञ्चित्कालमवसंस्तत्रैव। "अद्यैव फलितं चिरात्संवर्धितेनास्माकं मनोरथतरुणा, अद्यैव सुपक्वमस्मद्भागधेयेन, अद्यैव सञ्जाता सफलताऽस्माकं चक्षुश्श्रवसोः; चिरञ्जीवन्त्विमे स्वामिपादाः;सुचिरमत्रैव तिष्ठन्तु; पावयन्त्वस्मान् दृष्टिपातेन; प्लावयन्तु चानन्दामृतधारया

गीतोपदेशजनितया" इति श्रोतृजनमुखोत्थिताः वाचस्सर्वतः प्रसृतास्तदानीम् । केचिच्च स्वामिपादानां पूर्वपरिचिताः "अहो ! किमिदं (वेड्कट) रामोऽपीदानीं कृष्णस्सञ्जातो गीतोपदेशे, आः ! विस्मृतमस्माभिः, पूर्वमेव परित्यक्तमनेन रामत्वम्, अतस्समुचितमेव कृष्णीभवनं" इति परस्परमालपन्ति स्म । एवं श्रवणपुटैर्गीतारसमापिबन्तोऽमन्दानन्दभरिताः जनाः एनान् गीतास्वामिन इति समुचितेन नाम्ना व्यवहर्तुमारभन्त । ततः प्रभृति तदेव नाम प्रथितमभूदेतेषाम् ॥

न्युष्य च कियन्तञ्चन कालं दक्षिणदेशे, वाराणसीमेव परममावासस्थानमात्मनो मन्यमानाः, प्रतिनिवृत्य दक्षिणतः, प्राप्य वाराणसीं परमपावन्या भगवत्या भागीरथीलहर्या परिप्लाविततलां, तत्रापि गीतोपन्यासादिना सन्तमसमान्तरमपनयन्तस्तत्रत्यानां यदा अवसंस्तदा मधुरावासिभिः श्रीनटेशार्यैः स्वपितुराश्रमान्तरजिघृक्षोरुपदेशार्थं सादरं सानुनयं प्रार्थिता इमे पुनस्तत्र गत्वा यथावदनुगृह्य तान्, तैः "अत्रैव स्थित्वा कञ्चित्कालमनुग्राह्या वयं" इति पुनः पुनः प्रार्थ्यमाना अपि तदुपरि अतितरां न्यस्तप्रेमतया अनुल्लङ्घनीयमपि तदीयं वचः उल्लङ्घयैव, अविगणय्यैव तदीयां मानसीं व्यथां स्ववियोगप्रयुक्तां, उपदिष्टा इव गुरूणां गुरुणा भगवता परमेश्वरेण स्वीयं शरीरपातमासन्नकालिकं, बलादाकृष्टा इव प्रतिमुच्य स्वयंवरमालां भगवत्या मुक्तिलक्ष्म्या, ततः प्रतिनिवृत्य, प्राप्य च वाराणसीं द्वित्रान् मासानवसन् । ततः, "न ह वै सशरीरस्य

सतः प्रियाप्रिययोरपहतिरस्ति। अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत" इति श्रुतिवाक्यमनवरतमनुसन्दधानास्स्वयमेव शरीरबन्धपरिजिहीर्षया वा तन्मुखादवधीरितसुधारसं गीतामृतरसं पायं पायं तृप्तिमनासेदुषां, पुनरप्यनवरतं पिपासूनामतिकठिनेन दौर्भाग्यविलसितेन वा, विन्ध्यस्योत्तरदेशानुसारेण भावनामनि दक्षिणानुसारेण च दुन्दुभिनामनि वत्सरे तुलाकृष्णतृतीयायां रात्रावष्टवादनसमये भौतिकमिदं शरीरं भूतग्रामञ्च परित्यज्य नित्ये निरतिशये आनन्दैकरसे स्वप्रकाशे प्रज्ञानघने प्रज्ञानानन्दसरस्वत्य इमे सरस्वतीव नादेयमम्भः एकतामवापुः। ततः अवाप्तकामानां तेषां कृते न किञ्चिदवशिष्यते यद्यपि कर्त्तव्यं, तथापि स्वकर्त्तव्यमनुरुध्य तत्पूर्वाश्रमसोदरैः श्रीकृष्णशास्त्रिभिः परमहंसमुद्दिश्य यत्कर्त्तव्यं तदखिलं यथावदाब्दमनुष्ठाय सांवत्सरिके तदीये आराधने, सोदरभूतानां पूर्वस्मिन्नाश्रमे, परमहंसाश्रमे च परमाचार्यभूतानां तेषां निरतिशयकृपाभिलाषिभिः, श्रीगीतस्वामिविजयो नामायं ग्रन्थः स्वेन विरचितः समार्पितश्च प्रथमं तच्चरणनलिनयोस्तदीयभक्तेभ्यः सुहृद्भ्यश्च समर्प्यते सादरम्।

तस्मिन्नेव चावसरे नवभक्तिरसायनं नाम ग्रन्थोऽप्यन्यः स्वनिर्मितः भक्तिभरनम्रेण मनसा तच्चरणकमलयोः समर्पितः तत्स्मरणार्थं वितीर्यते लोकेभ्यः। यद्यपि श्रीमधुसूदनसरस्वतीभिरेकं "भक्तिरसायनं" विरचितं तथापि नेदानीं समग्रं तदुपलभ्यते। उपलभ्यमानेऽपि तस्मिन् अद्यतना

अन्तर्निगूढं रसभरमास्वादयितुमसमर्थाः सर्वोपकारकेऽपि तास्मिन् आत्मानुपकारकतामापादयन्ति । आधुनिका हि पुरुषाः अनधिगतश्रुतिस्मृतिपुराणाः जीविकार्थं भाषान्तरमभ्यस्यन्तः केनापि जन्मान्तरीयेण पुण्यपरीपाकेनास्मच्छास्त्रोक्तानां भक्त्यादीनामपि स्वरूपमधिजिगमिषवोऽपि अतिकठिनमपि दुरवगाहमपि विषयजातमतिसरळया शैल्या नातिकठिनया च गिरा प्रतिविषयमुदाहरणपरिपूरितया प्रतिपादितमभिलषन्ति । स्निह्यन्ति च तादृश एव ग्रन्थे नितरामिति निपुणतरं पर्यालोचयद्भिः श्रीकृष्णशास्त्रिवर्य्यैः आविद्वज्जनमागोपालाङ्गनं यथा महदुपकृता भवेयुर्लोकाः तथा प्रयतमानैः अस्मिन्नवभक्तिरसायने भक्तेस्स्वरूपं, तस्याः प्रकारः, तस्या नवविधत्वं, एकैकस्या अपि स्वरूपं, तस्यास्सुलभसाध्यता,तस्याश्चावश्यसम्पादनीयता,तदभावे च कथञ्चिदपि पुरुषस्य श्रेयःप्राप्त्यभावः इत्यादिकं सोदाहरणमतिगम्भीरैस्सरळैर्हृदयङ्गमैः पद्यैः कथं निरूपितं इत्यत्र ग्रन्थावेक्षकास्स्वयमेवात्मनः प्रमाणीभवेयुरिति नात्र बहु वक्तव्यम् । अतश्चानेन नवभक्तिरसायनेनातिमधुरेण तीव्रतरमनादिसिद्धमात्मनो भवरोगमुच्छिद्य,चिरादन्विष्यमाणं नित्यं निरतिशयमात्मीयमानन्दमवाप्य नित्यतृप्ता जना भवेयुरित्याशास्महे भगवन्तं भवानीपतिं श्रीविश्वेश्वरमिति सर्वं शिवम् ॥

आश्विनकृष्णैकादशी
संवत् १९८० वि०
६-१०-१९२३ ई०
वाराणसी

वेदविशारदः—चिन्नस्वामिशास्त्री
श्रीकाशीहिन्दूविश्वविद्यालये मीमांसाध्यापक

* श्रीः *

श्रीगीतास्वामिविजयः ॥

प्रणम्य श्रीगुरुं भक्त्या दक्षिणामूर्तिरूपिणम् ।
श्रीगीतास्वामिविजयो मया संगृह्य कीर्त्यते ॥ १ ॥

क्व गीतास्वामिचरितमवाङ्मनसगोचरम् ।
क्व च बालमतिस्सोऽहं करोमि बहुसाहसम् ॥ २ ॥

अथवा स्वामिपादानामपारगुणगौरवम् ।
बालं वाचालयति मां करुणा च महात्मनाम् ॥ ३ ॥

श्रीमत्काश्यपगोत्रदुग्धजलधेः श्रीरामलक्ष्मीसुत-
व्याजात्प्रादुरभूत्पुराऽमृतकलापूर्णेन्दुवद्भूतले ।
रामो नाम समस्तसद्गुणनिधिः श्रीवेङ्कटाद्यस्स्वयं
यस्तस्मै गुरुमूर्तये नम इदं प्रज्ञानपूर्णात्मने ॥ ४ ॥

श्रीमत्संगमनामभूसुरमहाग्रामे समृद्धे सदा
संपद्भिस्सकलार्तवीभिरभितः कात्यायनीमन्दिरे ।
गायत्रीगिरिजानदीप्रवरयोः पुण्ये महासङ्गमे
यश्च प्रादुरभूदवाग्दिशि नमस्तस्मै परस्मै मम ॥ ५ ॥

ऐश्वर्यं स्वस्य लोके प्रथयितुमिव योऽवातरच्चेश्वराब्दे
लग्नं कुंभं गतेऽर्के कविशनिसहिते मेषसंस्थे कुजेऽपि ।
चन्द्रे स्वस्थानकेतौ मकरगुरुबुधाश्लिष्टराहौ प्रभाते
यस्साक्षात्प्रादुरासीत् भवतु नम इदं सच्चिदानन्दभूम्ने ॥६॥

प्रथिते भृगुरामपालिते भगवच्छङ्करपादपाविते ।
बहुवर्षसमृद्धसज्जने प्रियभोगाढ्यलसत्पयोवने ॥ ७ ॥
अवघातपुरे[1] पुराऽऽर्जिते वटमूलालयदेवशोभिते ।
अवसन् निजवंशपूर्वजाः सुखमस्मै गुरवे नमो नमः ॥ ८ ॥

पुत्रेषु सत्स्वपि बहुष्वभिरूपरूपे
रामे न तृप्तिमगमन्नयनानि पित्रोः ।
ज्योतिःषु सत्स्वपि बहुष्वभितो जनानां
राकासुधाकररुचाविव शारदायाम् ॥ ९ ॥

---

१ कूटल्लूर २ पालक्काडु ३ कुत्तनूर

रूपे मारश्शूरभावे कुमारस्सारे शक्रो धीरतायां गिरीन्द्रः ।
ज्ञाने शंभुस्सद्गुणे रामचन्द्रश्चासीद्बुद्धौ यो गुरुस्तं नमामि ॥१०॥

बाल्ये पित्रोपनीतस्तदनु विरहितस्तेन दुर्दैवयोगा-
द्विद्याभ्यासं चकार स्वमतिकुशलतातोषिताचार्यसंघः ।
वैराग्यात्षोडशाब्दे विषयभवसुखे तत्त्वचिन्तापरोऽभूत्
यस्तस्मै भूयसां स्याद्विकरणनमसां मामिका मालिकेयम्॥११॥

यः श्रीकृष्णमुपाससाद वरदं भक्त्या भृशं पार्थव-
द्गायत्रीमपि मातरं सुरनदीग्रामेऽतिबाल्ये पुरा ।
पश्चाद्याग्रपुरेश्वरं खरमहाभाग्यं सिषेवे चिरं
तस्मै सद्गुरुमूर्तये नम इदं प्रज्ञानपूर्णात्मने ॥ १२ ॥

श्रीरामस्येव तृप्तिं दशरथनृपतिर्नागमद्दर्शनेन
शास्त्री सांबाभिधेयः क्षणमपि विरहं नैव सेहे च यस्य ।
साहित्यन्यायशास्त्रान्तरसुखविहृतां वीक्ष्य मेधामनन्द-
त्तस्मै प्रव्राजकानामपि कुलगुरवे हन्त भूयो नमोऽस्तु॥१३॥

---

१ अम्पलपुळे
२ वैक्कम्

कौमारे रघुनाथवत्परवशस्तीर्थादियात्रेच्छया
कृष्णेनानुजसोदरेण सह यः श्रीरामनाथं ययौ ।
तस्माद्रामकथासुधां श्रुतिपुटद्वन्द्वेन गत्वा पिबन्
श्रीकृष्णाब्धिसमुद्भतामभजत श्रीत्यागराजं चिरम् ॥१४॥

पश्चादभ्रंसभाषितं तरळयन्भक्त्यात्मविद्यागुरुं
श्रीमच्छाङ्करसूत्रभाष्यमपठत्कृष्णेन पूर्णं सह ।
सार्धं वर्षमहो चिदंबरमहाक्षेत्रे वसन्यः पुरा
तस्मै सद्गुरुमूर्तये नम इदं प्रज्ञानपूर्णात्मने ॥ १५ ॥

श्रीमच्चंपककाननान्तवसतिश्रीत्यागराजाध्वरि-
श्रेष्ठात्साखिलशास्त्रसारहृदयं शान्तस्वभावं गुरुम् ।
वेदान्ताशयबुद्धये हरिहरं शुश्रूषयाऽतोषय-
द्यस्तस्मै गुरुमूर्तये नम इदं प्रज्ञानपूर्णात्मने ॥ १६ ॥

श्रीरामायणगानकर्मणि जगद्विख्यातसत्ख्यातिमान्
वाल्मीकेरपरावतारसदृशः श्रीकृष्णशास्त्री महान् ।
यस्मिन्नात्मजबुद्धिमेव निदधावत्युत्तमैस्सद्गुणै-
स्तस्मै सद्गुरुमूर्तये नम इदं प्रज्ञानपूर्णात्मने ॥ १७ ॥

---

१ रामेश्वरम्
२ कमलालयस्थम्
३ चिदंबरम्
४ मन्नारकुटि

कृष्णेनावरजन्मनाप्युपगतश्शृंगेरिपीठोत्तमं
ब्रह्मानन्दसुधाब्धिमग्नहृदयश्चाचार्यचूडामणिम् ।
अध्यैष्टाप्यखिलागमान्तभगवत्पादीयभाष्याणि य-
स्तस्मै सद्गुरुमूर्तये नम इदं प्रज्ञानपूर्णात्मने ॥ १८ ॥

वेदान्तारण्यसिंहास्सततमभिनवश्रीनृसिंहार्यपादा
श्शृङ्गेरीपीठदेवास्सनकमुनिमुखस्तुत्यविज्ञानपूर्णाः ॥
व्यासाचार्याश्शुकर्षिप्रवरमिव जगद्देशिका यं ह्यपश्यन्
प्रज्ञानानन्दनाम्ने भवतु नम इदं देशिकेन्द्राय तस्मै ॥१९॥

नेत्रीभूतौ गुरूणामखिलभरवहावङ्घ्रियुग्मे तदीये
भक्तौ श्रीकण्ठकृष्णौ निगमरसविदौ नीतिशास्त्रप्रवीणौ ।
मेधाविद्याविलासैरनितरसुलभैर्येन विस्मापितौ तौ
प्रज्ञानानन्दनाम्ने भवतु नम इदं देशिकेन्द्राय तस्मै ॥२०॥

ख्यातौ जैमिनिबादरायणसमौ मीमांसयोर्हि द्वयोः
सुब्रह्मण्यसमाह्वयश्च सुधियौ श्रीवैद्यनाथाभिधः ।
यस्य द्वावपि सद्गुणैर्बहुमतिं सर्वोत्तरैश्चक्रतुः
तस्मै सद्गुरुमूर्तये नम इदं प्रज्ञानपूर्णात्मने ॥ २१ ॥

तीरे ताम्रापगाया दुरिततातिहरे पापनाशाभिधाने
शृङ्गेरीपीठराजेश्वरजगदखिलाचार्यसत्सन्निधाने ।
तीर्थे क्षेत्रप्रधाने घटजमुनिकृतोमेशकल्याणवेषे
द्रष्टुं भक्त्याऽऽगतायास्सुतगुरुजगदाचार्यपादान् समोदम् ॥२२॥

अन्त्ये काले जनन्या श्रुतिपुटमधुरैरात्मविद्योपदेशै-
रानन्दं वर्धयन् यः परशिवकृपया लोकसंपूजितायाः ।
कालं कञ्चिन्निनाय प्रियसहजवरैस्सोदरीभ्यां च साकं
प्रज्ञानानन्दनाम्ने भवतु नम इदं सच्चिदानन्दधाम्ने ॥२३॥

पुण्ये क्षेत्रे पुरात्तैः परिणतसुकृतैः पापनाशाभिधाने
देहान्मोक्षं गतां तां तदनु परपदं नीतवान्मुक्तगम्यम् ।
अन्त्यं कृत्यं च कृत्वा सह सहजवरैः शंकराचार्यवर्यः
प्रज्ञानानन्दभूम्ने भवतु नम इदं सच्चिदानन्दधाम्ने ॥२४॥

आसेतोराहिमाद्रेरमृतमयमहासारवाचां प्रवाहै-
र्भ्रात्रा कृष्णेन साकं त्रिविधजनमनस्तापमुन्मूलयन् सन् ।
लोकानानन्दयद्यः शरणमुपगतांस्तीर्थयात्रापदेशा-
त्सुब्रह्मण्यानुजेनाप्यनुगतचरणो हन्त तस्मै नमोऽस्तु २५॥

---

१ ताम्रवर्णी

आबाल्यादभिकांक्षितां भगवतीं काशीमुपागम्य यो
भ्रातृभ्यां सह विश्वनाथमभजत्कालं सुखं कञ्चन ।
चत्वारिंशति वत्सरे परिणतैः पुण्यैः पुरा संचितै-
स्तस्मै सद्गुरुमूर्तये नियमिनां नाथाय नित्यं नमः ॥२६॥

शुक्लाख्ये शुभवासरे गुरुमते ज्येष्ठे च मासेऽसिते
पक्षे पर्वणि सौरमानविधया मासे वृषे पिङ्गळे ।
वैराग्येण परेण यश्च परमं हंसाश्रमं प्राविश-
त्पूर्णानन्दवने नमो भगवते तस्मै यतीन्द्राय मे ॥ २७ ॥

मग्नांस्तारयितुं चिरान्नरवरान् संसारसिन्धोस्स्वतो-
ऽद्वैतानन्दसरस्वतीगुरुकृतं सन्यासधर्मं गतः ।
काश्यामेवमुवास तारकमठे पाठं यतीनां वदन्
वेदान्तार्थविदां य एव गुरवे पूर्णाय तस्मै नमः॥ २८ ॥

सेतोर्यात्रापदेशात्पुनरपि भगवत्पूज्यपादावतारा-
त्पुण्यां पूर्णातटस्थां प्रथितगुरुवरप्राप्तमूर्तिप्रतिष्ठाम् ।
प्रापद्यः कालटीं तां पथि किल भगवत्पादजन्मोत्सवार्थं
काशीतस्सामिशङ्कः भवतु नम इदं देशिकेन्द्राय तस्मै॥२९॥

---

१ श्रीकशी

भाग्यं प्राप्तं समस्तं परमशिव मया त्वत्प्रसादादिदानी-
मित्थं व्याघ्रालयेशे कथयितुमिव तं प्राप्य भूयोऽर्चयन्यः ।
चातुर्मास्याय तस्मादगमदपि नवं सालमार्याग्रहारं
साधूनां श्रोत्रियाणां भवतु नम इदं देशिकेन्द्राय तस्मै॥ ३०॥

वर्षैर्गीतामृतानां त्रिविधमपि परीतापमुन्मूलयन् सन्
सर्वानानन्दयंस्तान्परमपदपरब्रह्मसंबोधनेन ।
द्वौ मासौ तत्र नीत्वा सकलजननुतस्त्रैशिरः[2]पत्तनं यः
प्रापत्कृष्णेन साकं भवतु नम इदं देशिकेन्द्राय तस्मै॥ ३१॥

श्रीरङ्गे रङ्गनाथं तदनु गिरिवरे मातृभूतेश्वरं तं
जंबूनाथं च मार्गे[3]ऽभजदलमखिलाण्डेश्वरीमंबिकां यः ।
मीनाक्षीराजधानीं पुरमथ मधुरामागमद्दर्शनीयां
प्रज्ञानानन्दनाम्ने भवतु नम इदं देशिकेन्द्राय तस्मै ॥३२॥

गीता गीतास्समस्ता अपि हि भगवतो वासुदेवस्य येन
श्रीमद्धालास्यपुर्यां[1] सकलसुकृतिनां तत्वविज्ञानहेतोः ।
तस्मै वश्याय साक्षात्परगुरुवपुषे श्रीनटेशार्यभक्तेः
प्रज्ञानानन्दनाम्ने भवतु नम इदं सच्चिदानन्दभूम्ने ॥३३॥

---

१ पुदुकोट्टे २ त्रिचिनाप्पल्लि ३ दक्षिणमधुरा

श्रीगीतामृतवर्षणेन सकलं सन्तापमुन्मूल्य य-
स्स्वानन्दांबुधिमग्नमग्नहृदयानाबालगोपालकम् ।
युद्धादिश्रममन्तरेण मधुरालोकान्विधायाखिलान्
गीतास्वामिपदं जगाम गुरवे पूर्णाय तस्मै नमः ॥ ३४ ॥

हालास्यात्पुनरागमद्रघुपतेस्सेतुं ततः प्रार्थितो
भक्त्या जन्मपदं षंडर्धनयनग्रामं नटेशस्य यः ।
मासं तत्र विधाय वासमवसत्काशीं समागम्य तां
वेदान्तार्थपरश्च तारकमठे तस्मै परस्मै नमः ॥ ३५ ॥

ब्रह्मानन्दप्रणीतां हृदयबहुतमश्चान्द्रिकां चन्द्रिकां यः
टीकामद्वैतसिद्धेर्गुरुमुखपठितामादिशत्स्वागतानाम् ।
सिद्धान्तज्ञानहेतोश्शमदमकरुणादेवसंपत्तिभाजां
प्रज्ञानानन्दनाम्ने भवतु नम इदं देशिकेन्द्राय तस्मै ॥३६॥

आस्वाद्याद्भुतवाक्सुधारसझरीमानन्दसंदायिनी-
माशापाशशतेन बद्धहृदयास्संप्रार्थ्य यं सद्गुरुम् ।
घट्टे हन्त हनूमतश्शुकमठे स्वावासयन्भूसुरा-
स्तस्मै सद्गुरुमूर्तये यतिकुलश्रेष्ठाय भूयो नमः ॥ ३७ ॥

---

१ आरुपाति

सन्तापं शमयन् य एव करुणापूर्णैः कटाक्षामृतैः
क्षुत्तृष्णे क्षपयन्सुधारसमुचां वाचां विलासैस्सताम् ।
संसाराभिधबन्धमात्मगमहाविद्यासिना छेदयन्
कालं कञ्चन नीतवान्शुकमठे तस्मै परस्मै नमः ॥ ३८ ॥

पित्रे सन्यासदीक्षावितरणकथया श्रीनटेशार्यमुख्यै-
र्भक्त्या यः प्रार्थितस्सन्पुनरपि मधुरामागमद्राजधानीम् ।
मीनाक्ष्यास्सुन्दरेशप्रचुरतरमहाभाग्यलक्ष्म्याः प्रमोदात्
प्रज्ञानानन्दनाम्ने भवतु नम इदं सच्चिदानन्दधाम्ने ॥ ३९ ॥

भक्त्या श्रीदण्डपाण्यध्वरिवरसुहृदा तत्र सम्प्रार्थितस्सन्
विद्यामान्येन तेनाप्रविशदनुगतोऽद्वैतविद्यासभां यः ।
ब्रह्मानन्दानुभूतेः प्रथयितुमखिलं प्राभवं पण्डितानां
प्रज्ञानानन्दनाम्ने भवतु नम इदं सच्चिदानन्दभूम्ने ॥ ४० ॥

अन्तस्फूर्जदमेयबोधपरमानन्दप्रवाहोपमै-
र्गङ्गातुङ्गतरङ्गसङ्गरजयासङ्गप्रसङ्गोदयैः ।
यश्चाप्लावयदास्यपद्मविगलद्वेदान्तवाक्यामृतै-
र्विस्मार्याखिलपण्डितान्सदसि नस्तस्मै परस्मै नमः ॥ ४१ ॥

देवानां ब्रह्मगीतामुपनिषदुदितब्रह्मगीतातिपूतां
देवानां ब्रह्मगीताम्भुवि निजमधुरावासिभक्तोत्तमानाम् ।
गायन्यः श्रीजयन्तीमहमपि भगवत्पूज्यपादस्य पूज्यं
शिष्यैस्साकं व्यतानीद्भवतु नम इदं देशिकेन्द्राय तस्मै॥४२॥

बन्धून्सन्न सहोदरानुपगतान्पूर्वाश्रमे स्वागमं
श्रुत्वा भक्तिबहुप्रहर्षभरिताश्चारायणादींस्ततः ।
आश्वासप्रियसारसूनृतगिराप्यानन्दयद्यस्तथा
सोदर्यौ स्वपदारविन्दशरणे तस्मै परस्मै नमः ॥ ४३ ॥

सामोदं श्लाघयन् यस्सकलमतिमतामग्रतस्सज्जनानां
कृष्णं निर्व्याजभक्तं निजपदकमले प्राणतुल्यं व्यजानात् ।
गाम्भीर्यापारधैर्योपरतिमतिदयासद्गुणावासभूमिः
श्रीगीतास्वामिनाम्ने भवतु नम इदं देशिकेन्द्राय तस्मै॥४४॥

नत्वा श्रीसुन्दरेशं प्रतिदिनमखिलानन्ददानस्वतन्त्रां
मीनाक्षीं मातरं तां परवशहृदयां भक्तिभारेण कुर्वन् ।
लोकानानन्दयद्यस्त्वमृतमयकलावाग्विलासैस्समस्तान्
प्रज्ञानानन्दनाम्ने भवतु नम इदं देशिकेन्द्राय तस्मै ॥ ४५ ॥

आपृच्छ्यानेकवारं सकरुणनयनालोकनैस्तर्पयन्त्यां
मीनाक्ष्यामम्बिकायां दिश मम सततं काशिकावासमेवम्।
वेगादागात्स्वकाशीं क्षणमपि विरहे भीतभीतो गताब्दे
श्रीमान्यो नो यतीन्द्रो भवतु नम इदं देशिकान्द्राय तस्मै॥४६॥

यस्याकर्ण्य वचोझरीमपि वियत्कल्लोलिनीस्पर्धिनीं
श्रीकाञ्चीपुरकामकोटिगुरुराट् सम्भावयामास च।
यः काशीशुकदेवनामकमठालङ्कारभावं ययौ
तस्मै सद्गुरुमूर्त्तये नम इदं प्रज्ञानपूर्णात्मने॥ ४७॥

यः श्रीरामकथामृतंतुं सततं पीत्वा न तृप्तिं गतः
श्रीमद्भाष्यसुधासमुद्रलहरीडोलासु खेलन्नपि।
गङ्गानन्दवनेश्वरादिभजनानन्दैकदीक्षागुरु-
स्तस्मै सद्गुरुमूर्तये यतिपतिश्रेष्ठाय भूयो नमः॥ ४८॥

नित्यं केदारतीर्थे रुचिरसुरसरिद्वारिपूरेऽभिषेकं
कृत्वा यच्चाह्निकं श्रीवटतरुवसतेस्सन्निधाने गुरोर्यः।
मन्त्रानावर्त्तयंस्तं करतलवशगं कारयामास भक्त्या
प्रज्ञानानन्दनाम्ने भवतु नम इदं देशिकेन्द्राय तस्मै॥ ४९॥

यात्रां नित्याञ्च नित्यं नियमयमयुतस्तीव्रवैराग्यपूर्वं
कुर्वन्विश्वेश्वरं द्राक्करगतबदरं यस्सदारञ्चकार ।
भक्त्या वेदान्तविद्यापरिणतिपरयाऽनन्यया काशिकायां
श्रीगीतास्वामिनाम्ने भवतु नम इदं देशिकेन्द्राय तस्मै ॥५०॥

जायापुत्रधनैषणात्रयजयेनालोक्य सर्वात्मता—
मायासेन विनैव सच्चिदमितानन्दात्मभावं गतः ।
मायामानुषवेषतश्शुकमठालङ्कारभावं ययौ
यस्तस्मै गुरुमूर्तये नम इदं प्रज्ञानपूर्णात्मने ॥ ५१ ॥

संसारामिततापतप्तजनतामादेशकुम्भस्रव-
त्स्वानन्दामृतनिर्झरैस्सुखयितुं यः प्राप्तदीक्षस्स्वयम् ।
ब्रह्मानन्दघनात्मना शुकमठालङ्कारभावं ययौ
तस्मै सद्गुरुमूर्त्तये नम इदं प्रज्ञानपूर्णात्मने ॥ ५२ ॥

जीवन्मुक्तगुणातिगस्थितमहाप्रज्ञादिलिङ्गैर्दया-
ऽऽलोकादेशवचोभिरन्तरमितानन्दामृताडम्बरैः ।
आचण्डालमभेदभावमधुरैरानन्दयद्यस्सदा
तस्मै सद्गुरुमूर्त्तये नम इदं प्रज्ञानपूर्णात्मने ॥ ५३ ॥

एवं काशीनिवासादनुपमपरमानन्दपीयूषसिन्धौ
मग्नो मग्नो न यस्तत्तृणमपि गणयामास सायुज्यसौख्यम्।
भोगे प्रारब्धतन्त्रे विकृतिविरहितस्साक्षिभावेन तिष्ठन्
प्रज्ञानानन्दनाम्ने भवतु नम इदं देशिकेन्द्राय तस्मै ॥५४॥

काशीवाससुखं सुखेन जुषतो यस्याप्यतीते चतु-
श्चत्वारिंशति वत्सरे किल महाप्रारब्धदोषोत्थितः।
पूर्वं कश्चन सन्निपातविषमः प्राप्तश्शरीरे ज्वरः
तस्मै सद्गुरुमूर्त्तये नम इदं प्रज्ञानपूर्णात्मने ॥ ५५ ॥

कर्णारुन्तुदवृत्तमेतदखिलं श्रुत्वैव यस्य द्रुतं-
काशीतश्शिवरामकृष्णसहजात्कृष्णोऽतिदुःखार्दितः।
सुब्रह्मण्यसहोदरेण सहितः कार्शीं समागम्य त-
द्भैषज्यं भिषजां वरैर्व्यरचयत्तस्मै परस्मै नमः ॥ ५६ ॥

कैङ्कर्याय धनं तृणञ्च गणयन्कृष्णोऽपि यस्याकरो-
दायुर्वेदविशारदैर्बहुविधां भक्त्या चिकित्सां जवात्।
शिष्यैर्भक्तजनैस्सहैव सहजैर्नक्तंदिवं श्रद्धया
तस्मै सद्गुरुमूर्त्तये नम इदं प्रज्ञानपूर्णात्मने ॥ ५७ ॥

एवं पक्षचिकित्सया प्रतिदिनं शान्तोऽपि घोरज्वरः
प्रारब्धेन बलाधिकोऽयमिति यो विज्ञाय तत्त्वं निजम् ।
आहूयाद्वयभक्तमात्मचरणद्वन्द्वे तु कृष्णं मुदा
तञ्चाज्ञापयदेवमेव यमिनाज्ञाथाय तस्मै नमः ॥ ५८ ॥

विवेकचूड़ामणिमेव नित्यं श्रोतुं मनो मे जुषते प्रमोदम् ।
अतस्त्वमेतं पठ सन्निधाने कृष्णेति यः प्राह नमोऽस्तु तस्मै ॥५९॥

आज्ञां यदीयां शिरसा वहन्सन्विवेकचूड़ामणिमेव सोऽपि ।
आनन्दमुत्पादयति स्म नित्यं यस्यान्तिके वै मधुरं पठन्सन् ॥६०॥

शृण्वञ्छ्रुतिभ्यां तमतीव मोदात्समाद धौ चित्तमपास्तखेदम् ।
आनन्दपूर्णात्मनि सत्यबोधे यस्सर्वदा तस्य नमो नमोऽस्तु ॥६१॥

ज्ञात्वा देहविसर्गकालमथ तान्कृष्णादिभक्तान्वद-
न्नाहूयाहमिदं शरीरमधुना त्यक्त्वाऽऽत्मविद्या हुतम् ।
ब्रह्मीभावमुपैमि सत्यमिति यो विश्वेश्वरैक्यं ययौ
तस्मै सद्गुरुमूर्त्तये नम इदं प्रज्ञानपूर्णात्मने ॥ ६२ ॥

सौरे दुन्दुभिवत्सरे दिनकरे पादावशेषां तुलां
प्राप्ते कृष्णतृतीयमङ्गलनिशापूर्वार्धयामे गते ।
भावाब्दे परमं पदं गुरुमते मासे च यः कार्त्तिके
प्राप्तोऽभूद्गुरुमूर्त्तये भगवते तस्मै परस्मै नमः ॥ ६३ ॥

प्राप्ते काश्यां यतीन्द्रे परममिहपदं प्राणतुल्ये हि यस्मि-
न्प्राणानुद्वन्तुकामान्परिणतिविषमं कर्म्म मे निर्बबन्ध ।
एवं कृष्णोऽन्वशोचन्नियमनविदलद्दुःखवेगप्रसङ्गे
श्रीगीतास्वामिनाम्ने भवतु नम इदं देशिकेन्द्राय तस्मै ६४॥

ब्रह्मीभूते च यस्मिन्व्यथितमतितरां मानसं जातमासी-
त्कृष्णादीनां जनानामुपनिषदुदितब्रह्मबोधे स्थितेऽपि ।
कृच्छ्रालुब्ध्वाऽऽत्मधैर्य्यं तदनु रचयितुं यस्य गङ्गासमाधिं
कृष्णस्सज्जो बभूव द्विजवरसहजैस्साकमस्मै नमोस्तु ६५॥

पूजां ब्राह्मणवेदघोषमधुरां भेरीमृदङ्गोल्लस-
त्तालालिङ्गितवाद्यगीतसहितं भक्त्यैव यस्याचरन् ।
गत्वा श्रीमणिकर्णिकां भगवतीं तस्यां समाधिं व्यधात्
कृष्णो भक्तजनैस्सहेह गुरवे तस्मै परस्मै नमः ॥ ६६ ॥

सालग्रामेऽपि गङ्गापयसि दशदिनं पूजयन्सङ्गुरुं यं
सत्पात्रं पायसान्नं धरणिमखभुजे पात्रभूताय दत्त्वा ।
पूर्णाराधनान्तामकुरुत महतीं यस्य पूजामनेकैः
कृष्णस्साकं द्विजेन्द्रैर्भवतु नम इदं देशिकेन्द्राय तस्मै॥६७॥

भक्तैर्वेङ्कोबरावाभिधवरमधुराश्रीनटेशार्य्यमुख्यै-
रिसद्धैस्सम्प्रेषितार्थैरश्रुतिपदरसिकान्ब्राह्मणान् यत्स्वरूपान्
भक्ष्यैर्भोज्यैर्विचित्रैरमृतरसभरैर्दक्षिणावस्त्रपूर्वैः
कृष्णोऽप्याराधयत्स्वैर्भवतु नम इदं देशिकेन्द्राय तस्मै ॥६८॥

भुक्त्वाऽऽकण्ठं समोदं परवशहृदया धन्यवादान्वदन्तः
कीर्त्तिं विस्तारयन्तस्सदासि यतिपतेर्यस्य चित्रां महान्तः।
आशीर्वादानकार्षुर्द्विजवरतिलकास्साक्षतान्वेदमन्त्रैः
कृष्णादीनां जनानां भवतु नम इदं देशिकेन्द्राय तस्मै॥६९॥

श्रीकाश्यां प्रतिमासमेवमवनीदेवेन्द्रपूजामुखा-
त्कृष्णाराधितपादुकस्य महतां पूज्यस्य यस्याधुना ।
पूर्णोऽभूत्प्रथमाब्दिकोऽखिलबुधानन्दो महानुत्सव-
स्तस्मै सद्गुरुमूर्तये नम इदं भूयोऽपि भूयो नमः ॥७०॥

धन्यं धन्यं कुलं नः पदयुगरजसा पावितं यद्गुरूणां
प्रज्ञानानन्दनाम्नामधिगतयशसामष्टदिङ्मण्डलेऽपि ।
धन्यौ धन्यौ तदीयाविह किल पितरौ धन्यधन्यास्तदीयाः
धन्या धन्या वयश्च प्रियमधुरकथालापसेवादिभाजः॥७१॥

प्रज्ञानानन्दनामा परमहितमयं सच्चिदानन्दभूमा
काशीविश्वेशधामा वितरतु सततं कल्पवृक्षादिसीमा ।
देवाचार्याभिधीमानपि नतसुधियां प्रार्थितान्सर्वकामान्
श्रीमान्योगीन्द्रमौलिर्जयतु च भगवान्नम्रभूपालमौलिः॥७२॥

यः श्रीवाञ्छिमहीतलेन्द्रतिलकश्रीमूलराजोदित-
स्यानन्दूरपुरस्थसंस्कृतकलाश्रीपाठशालोदरे ।
विद्याजन्म समेत्य पूर्वमधुना श्रेयः परं प्राप्तवान्
कृष्णस्तस्य कृतिष्वयं हि विजयःपूर्णोऽभवत्स्वामिनाम्॥७३॥

श्रीगीतास्वामिविजयः पूर्णः कृष्णेन निर्मितः ।
प्रसादयतु चेतांसि गुरूणां च महात्मनाम् ॥

इति श्रीकृष्णशास्त्रिकृतिषु श्रीगीतास्वामिविजयस्संपूर्णः ॥

॥ स्वस्त्यस्तु ॥ शान्तिरस्तु ॥

6214
R65(அரி)

* श्रीः *

श्रीगीतास्वामिपादानां विदेह मुक्तिसमये ग्रन्थकारैः कृताः श्लोकाः ।

प्रज्ञानानन्दहंसप्रवरकुलमणिर्भावसंवत्सरेऽस्मिन्
सौरे सूर्ये तुलास्थे क्षितिसुतदिवसे पूर्वयामे निशायाम् ।
प्राणश्रोत्रेन्द्रियान्तःकरणगणयुतं स्थूलदेहं विहाय
ब्रह्मीभावं हि काश्यामगमदवितथानन्दमात्मस्वरूपम् ॥ १ ॥

ब्रह्मीभावं गतेऽस्मिन् यतिवरवृषभे भूमिदेवैस्सुधीभि-
स्साकं सर्वेऽपि देवाः परवशमनसस्स्वाश्रुबिन्दूनमुञ्चन् ।
ईषद्धर्षच्छलेन स्वशुचमिव भृशं व्यञ्जयन्तस्तदानीं
सूर्योऽप्यन्तर्हितोऽभूद्व्यथित इव महादुर्दिनश्रीं प्रकाश्य ॥२॥

सरस्वत्याश्शान्ताः प्रियतरविलासा बहुविधाः
प्रहर्षा गीताया अपि भगवतश्शान्तिमभजन् ।
श्रियो विद्यायाश्च प्रलयमगमन्नात्मविषयः ।
गते ब्रह्मीभावं गुरुयतिवरे पूर्णसुगुणे ॥ ३ ॥

वैराग्यस्य शिरोऽपतत्क्षितितले भक्तेश्च भाग्यं गतं
शान्त्यादेश्च समाश्रयो लयमगाच्छान्तश्च बुद्धेर्महः ।
सौशील्यस्य जयो व्ययं समगमद्भ्रष्टो दयाया मदो
ब्रह्मीभावमुपागते गुरुवरे ह्यस्मिन् महापूरुषे ॥ ४ ॥

गाम्भीर्यस्य पराजयोऽभवदहो धैर्यस्य धैर्यं गतं
सौन्दर्यस्य च मानहानिरभवद्वीर्यस्य लुप्तं बलम् ।
औदार्यस्य यशो विनष्टमभवच्छ्रीविश्वनाथं गते
काश्यां तारकवैभवेन परमे हंसे गुरौ सांप्रतम् ॥ ५ ॥

A. No.....



॥ श्रीः ॥

श्रीकाशीहिन्दू विश्वविद्यालय मीमांसाध्यापक

श्रीचिन्नस्वामिशास्त्रिकृताः

श्रीगीतास्वामिपादविदेहमुक्तिश्लोकाः ।

प्रज्ञानानन्दयोगीन्द्रो यतिराजोऽविमुक्तके ।
संत्यज्य भौतिकं देहमात्मारामो विराजते ॥ १ ॥

अयमद्य विधूय बन्धनं चिरकालानुसृतं भवाभिधम् ।
निजभावमवाप्य भासते नितरां योगिवरो गतस्पृहः ॥ २ ॥

जनता परमत्रवञ्चिता हरतैनं विधिना दुरात्मना ।
प्रतिपाद्य पुरा वचोनिधिं मधुराभाषिणमेनमंजसा ॥

नियतिर्गलिता जनस्य वा किमसूयापरवान् विधिर्भवेत् ।
अथवा यतिराट् स्वयं जहौ निजदेहं विरतोऽद्य भौतिकम् ॥४॥

क्वासौ पण्डितमण्डलीनिजमनो विस्मापनी चातुरी
मोचासारभृतां सुधारसमुचां वाचां श्रयेत् कं जनम् ।
येयं रागिषु चञ्चलामतितरामर्थैकतानां स्थितिं
पश्यन्त्यात्मरतिं विधूतरजसं कर्मन्दिनं संश्रिता ॥ ५ ॥

हंसीभूय द्विजातिर्निजनिलयमसौ सत्वरं प्राप्तुकामो
हित्वा पङ्काभिभूतं जलनिलयमिमं सारसाधिष्ठितं च ।
अच्छाच्छं नित्यशुद्धं निरवधिविभवं राजहंसोपसेव्यं
प्राप्य द्राक् मानसं तच्चिरमभिलषितं राजते निष्कलङ्कः ॥ ६॥

